# Shri Dakshinakalikayah Trailokyamohanakavacham

# श्रीदक्षिणकालिकायाः त्रैलोक्यमोहनकवचम्

## Document Information

Text title : Trailokyamohanakaaliikavacham

File name : trailokyamohanakaaliikavacham.itx

Category : kavacha, devii, dashamahAvidyA, devI

Location : doc_devii

Author : Traditional

Transliterated by : Ravin Bhalekar ravibhalekar at hotmail.com

Proofread by : Ravin Bhalekar, Rajani Arjun Shankar

Description-comments : rudrayAmale deviishankarasa.nvAde

Latest update : February 25, 2025

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

February 25, 2025

*sanskritdocuments.org*

# श्रीदक्षिणकालिकायाः त्रैलोक्यमोहनकवचम्

श्रीगणेशाय नमः ।
श्रीदेव्युवाच ।
देवदेव! महादेव! संसारप्रीतिकारक ।
सर्वविद्येश्वरी-विद्याकवचं कथयध्रुवम् ॥ १॥ (कथयाद्भुताम्)

श्रीशिव उवाच ।
शृणु देवि महाविद्यां सर्वविद्योत्तमोत्तमाम् ।
सर्वेश्वरीं महाविद्यां सर्वदेवप्रपूजिताम् ॥ २॥

यस्याः कटाक्षमात्रेण त्रैलोक्यविजयी हरः ।
बभूव कमलानाथो विष्णुर्ब्रह्मा प्रजापतिः ॥ ३॥ (विभुर्ब्रह्मा)

शचीस्वामी देवनाथो यमोऽपि धर्मनायकः । (यमनायकः)
त्रैलोक्यपावनी गङ्गा कमला श्रीर्हरिप्रिया ॥ ४॥

दिनस्वामी रविश्चन्द्रो निशापतिर्ग्रहेश्वरः ।
जलाधिपश्च वरुणो कुबेरोऽपि धनेश्वरः ॥ ५॥

अव्याहतगतिर्वायुर्गजास्यो विघ्ननाशकः । (विघ्ननायकः)
वागीश्वरः सुराचार्यो दैत्याचार्यो गुरुः कविः ॥ ६॥ (महाकविः)

एवं हि सर्वदेवाश्च सर्वसिद्धिश्वराः प्रिये ।
तस्यास्तु कवचं दिव्यं मन्त्ररूपं विभावय ॥ ७॥

ॐ अस्य श्रीदक्षिणकालीकवचमन्त्रस्य भैरव ऋषिः,
अनुष्टुप् छन्दः, श्मशानकाली देवता,
धर्मार्थकाममोक्षार्थे जपे विनियोगः ।
(ऋष्यादि न्यासः ।
श्रीमहाकालभैरवाय नमः शिरसि ।
अनुष्टुप्छन्दसे नमः मुखे ।

श्रीदक्षिकालिकादेवतायै नमः हृदि ।
धर्मार्थकाममोक्षार्थे पाठे विनियोगाय नमः अञ्जलौ ।)

ललाटं पातु च क्रीं मे हरेणाराधिता सदा ।
नेत्रे मे रक्षतु क्रीं क्रीं विष्णुना सेविता पुरा ॥ ८॥

क्रीं हूँ ह्रीं नासिकां पातु ब्रह्मणा सेविता पुरा ।
क्रीं क्रीं क्रीं वदनं पातु शक्रेणाराधिता सदा ॥ ९॥

क्रीं स्वाहा श्रवणं पातु यमेनैव प्रपूजिता ।
क्रीं हूँ ह्रीं स्वाहा रसनां गङ्गया सेविताऽवतु ॥ १०॥

दन्तपङ्क्तिं सदा पातु ॐ क्रीं हूँ ह्रीं स्वाहा मम ।
भुक्तिमुक्तिप्रदा काली श्रिया नित्यं सुसेविता ॥ ११॥

ओष्ठाधरं सदा पातु क्रीं क्रीं हूँ हूँ ह्रीं ह्रीं मम
सूर्येणाराधिता विद्या सर्वसिद्धि-प्रदायिका ॥ १२॥

कण्ठं पातु महाकाली ॐ क्रीं ह्रीं में स्वाहा मम ।
चन्द्रेणाराधिता विद्या चतुर्वर्गफलप्रदा ॥ १३॥

हस्तयुग्मं सदा पातु क्रीं क्रीं हूँ हूँ ह्रीं ह्रीं स्वाहा ।
सौख्यदा मोक्षदा काली वरुणेनैव सेविता ॥ १४॥

ॐ क्रीं क्रीं हूँ ह्रीं फट् स्वाहा, हृदयं पातु सर्वदा ।
सर्वसम्पत्प्रदा काली कुबेरेणोपसेविता ॥ १५॥

ऐं ह्रीं ॐ ऐं हूँ फट् स्वाहा स्तनद्वन्द्वं सदावतु ।
वायुनोपासिता काली यशोबल-सुखप्रदा ॥ १६॥

क्रीं क्रीं हूँ हूँ ह्रीं ह्रीं फट् च सा पातु जठरं मम ।
सर्वसिद्धिप्रदा काली गणनाथेन सेविता ॥ १७॥

क्रीं दक्षिणे कालिके ह्रीं स्वाहा नाभिं ममाऽवतु ।
सिद्धिबुद्धिकरी काली गुरुणा सेविता पुरा ॥ १८॥

लिङ्गं पातु सदा हूँ हूँ दक्षिणे कालिके ह्रीं ह्रीं ।
शुक्रेणाराधिता काली त्रैलोक्य-जयदायिनी ॥ १९॥

पात्वण्ड-कोशं फट् क्रीं क्रीं ,दक्षिणे कालिके स्वाहा ।
धरया सेविता विद्या सर्वरत्न-प्रदायिनी ॥ २०॥

पातु गुदं क्रीं क्रीं दक्षिणे कालिके ह्रीं ह्रीं स्वाहा ।
द्वादशी च महाविद्या राघवेणार्चिता सदा ॥ २१॥

जानुनी पातु ॐ क्रीं क्रीं दक्षिणे कालिके स्वाहा ।
एकादशी महाविद्या मेघनादेन सेविता ॥ २२॥

क्रीं क्रीं दक्षिणे कालिके ह्रीं ह्रीं स्वाहा जङ्घेऽवतु
द्वादशी च महाविद्या प्रह्लादेन च सेविता ॥ २३॥

क्रीं हूँ ह्रीं दक्षिणे कालिके क्रीं हूँ ह्रीं स्वाहाऽवतु ।
चतुर्दशी पादयुग्मं गुरुदेवेन सेविता ॥ २४॥

क्रीं हूँ ह्रीं दक्षिणे कालिके क्रीं हूँ ह्रीं तथाऽङ्गुलीः ।
पातु मे द्वादशी काली क्षेत्रपालेन सेविता ॥ २५॥

ॐ क्रीं हूँ ह्रीं दक्षिणे कालिके क्रीं हूँ ह्रीं स्वाहा च ।
नखान्सर्वान्सदा पातु पञ्चदशी ग्रहेश्वरी ॥ २६॥

क्रीं क्रीं क्रीं हूँ हूँ ह्रीं ह्रीं दक्षिणे कालिके क्रीं क्रीं क्रीं ।
मम पृष्ठे सदा पातु षोडशी परमेश्वरी ॥ २७॥

क्रीं क्रीं क्रीं पातु रोमाणि हूँ हूँ रक्षतु वर्मणि ।
मांसं पातु सदा ह्रीं ह्रीं रक्तं दक्षिणकालिका ॥ २८॥

क्रीं क्रीं क्रीं पातु मे चास्थि मज्जां हूँ हूँ सदाऽवतु ।
ह्रीं ह्रीं शुक्रं सदा पातु रंध्रं स्वाहा ममाऽवतु ॥ २९॥

द्वाविंशत्यक्षरी विद्या सर्वलोकेषु दुर्लभा ।
महाविद्येश्वरी विद्या सर्वतन्त्रेषु गोपिता ॥ ३०॥

सूर्यवंशेन सोमेन रामेण जमदग्निना ।
जयन्तेन सुनन्देन बलिना नारदेन च ॥ ३१॥

विभीषणेन बाणेन भृगुणा कश्यपेन च ।
कपिलेन वसिष्ठेन धौम्येन त्रिपुरेण च ॥ ३२॥

मार्कण्डयेन ध्रुवेणैव द्रोणेन सत्यभामया ।
ऋष्यशृङ्गेन कर्णेन भारद्वाजेन संयुता ॥ ३३॥

सर्वैराराधिता विद्या जरामृत्यु-विनाशिनी ।

पूर्णविद्या महाकाली विद्याराज्ञी प्रकीर्तिता ॥ ३४॥

काली कपालिनी कुल्ला कुरुकुल्ला विरोधिनी ।
विप्रचित्ता तथोग्रोग्र-प्रभा दीप्ता घनत्विषा ॥ ३५॥

नीला घना बलाका च मात्रा मुद्रा मिताऽपि च ।
एताः सर्वा खड्गधरा मुण्डमाला-विभूषणा ॥ ३६॥

हूँ हूँकाराट्टहासेन सर्वत्र पातु मां सदा ।
ब्रह्माणी पातु मां पूर्वे चाग्नेय्यां वैष्णवी तथा ॥ ३७॥

माहेश्वरी पातु याम्ये चामुण्डा नैर्ऋते सदा ।
कौमारी वारुणे पातु वायव्ये चाऽपराजिता ॥ ३८॥

वाराही चोत्तरे पातु चेशान्यां नारसिंहिका ।
अध ऊर्ध्वे पातु काली पार्श्वे पृष्ठे च कालिका ॥ ३९॥

जले स्थले च पाताले शयने भोजने गृहे
राजस्थाने कानने च विवादे मरणे रणे ॥ ४०॥

पर्वते प्रान्तरे शून्ये पातु मां कालिका सदा ।
शवासने श्मशाने वा शून्यागारे चतुष्पथे ॥ ४१॥

यत्र यत्र भयप्राप्तिः सर्वत्र पातु कालिका ।
नक्षत्रतिथिवारेषु योग-करणयोरपि ॥ ४२॥

मासे पक्षे वत्सरे च दण्डे यामे निमेषके ।
दिवारात्रौ सदा पातु सन्ध्ययोः पातु कालिका ॥ ४३॥

सर्वत्र कालिका पातु कालिका पातु सर्वदा ।
सकृद्यः शृणुयान्नित्यं कवचं शिवनिर्मितम् ॥ ४४॥

सर्वपापं परित्यज्य गच्छेच्छिवस्य चालयम् ।
त्रैलोक्यमोहनं दिव्यं देवतानां सुदुर्लभम् ॥ ४५॥

यः पठेत्साधकाधीशः सर्वकर्म-जयान्वितः ।
सर्वधर्मे भवेद्धर्मी सर्वविद्येश्वरेश्वरः ॥ ४६॥

कुबेर इव वित्ताढ्यः सुवाणी कोकिलस्वरः ।
कवित्वे व्याससदृशो गणेशवच्छ्रुतिधरः ॥ ४७॥

कामदेवसमो रूपे वायुतुल्यः पराक्रमे ।
महेश इव योगीन्द्र ऐश्वर्ये सुरनायकः ॥ ४८॥

बृहस्पतिसमो धीमान् जरामृत्यु-विवर्जितः ।
सर्वज्ञः सर्वदर्शी च निष्पापः सकलप्रियः ॥ ४९॥

अव्याहतगतिः शान्तो भार्यापुत्र-समन्वितः ।
यो देहे कुरुते नित्यं कवचं देवदुर्लभम् ॥ ५०॥

न शोको न भयं क्लेशो न रोगो न पराजयः ।
धनहानिर्विषादोऽपि परव्याधिर्भवेन्नहि ॥ ५१॥

सङ्ग्रामेषु जयेच्छत्रून् यथा वह्निर्दहेद्वनम् ।
ब्रह्मास्त्रास्त्रान्य-शस्त्राणि पशवः कण्टकादयः ॥ ५२॥

तस्य देहं न भिनत्ति वज्राधिकं भवेद्वपुः ।
ग्रहभूतपिशाश्च यक्ष राक्षस किन्नराः ॥ ५३॥

सर्वे दूरात्पलायन्ते हिंसको नश्यति ध्रुवम् ।
तद्देहं न दहेदग्निर्न तापयति भास्करः ॥ ५४॥

न शोषयति वातोऽपि न क्लेदं कुरुते पयः ।
पुत्रवत्पाल्यते काल्या न हिमं कुरु ते शशी ॥ ५५॥

जल-सूर्येन्दु-वातानां स्तम्भके नात्र संशयः ।
बहु किं कथयिष्यामि सर्वसिद्धिमुपालभेत् ॥ ५६॥

राज्यं भोगं सुखं लब्ध्वा स्वेच्छयापि शिवो भवेत् ।
मोहन-स्तम्भनाकर्ष-मारणोच्चाटनं भवेत् ॥ ५७॥

काकवन्ध्या च या नारी वन्ध्या वा मृतपुत्रिका ।
कण्ठे वा दक्षिणे बाहौ लिखित्वा धारयेद्यदि ॥ ५८॥

तदा पुत्रो भवेत्सत्यं चिरायुः पण्डितः शुचिः ।
स्वामिनो वल्लभा सापि धनधान्य-सुतान्विता ॥ ५९॥

इदं कवचमज्ञात्वा यो जपेत्कालिकामनुम् ।
ध्यानेन कोटिजप्तेन तस्य विद्या न सिद्ध्यति ॥ ६०॥

पदे पदे भवेद्दुखं लोकानां निन्दितो ध्रुवम् ।
इहलोके भवेद्दुःखी परे च नरकं व्रजेत् ॥ ६१॥

गुरुं मनुं समं ज्ञात्वा यः पठेत्कवचोत्तमम् ।
तस्य विद्या भवेत्सिद्धा सत्यं सत्यं वरानने ॥ ६२॥

य इदं कवचं दिव्यं प्रकाश्य सिद्धिहा भवेत् ।
भक्ताय श्रेष्ठपुत्राय साधकाय प्रकाशयेत् ॥ ६३॥

॥ इति श्रीरुद्रयामले देवीशङ्कर संवादे
त्रैलोक्यमोहनं नाम कवचं अथवा दक्षिणाकालिकाकवचं सम्पूर्णम् ॥

Encoded Ravin Bhalekar ravibhalekar@hotmail.com

Proofread by Ravin Bhaleka, Rajani Arjun Shankar

*Shri Dakshinakalikayah Trailokyamohanakavacham*

pdf was typeset on February 25, 2025

Please send corrections to *sanskrit@cheerful.com*